# Shivaproktam Vishveshvarajyotirlingarchanopadesham

# શિવપ્રોક્તં વિશ્વેશ્વરજ્યોતિર્લિઙ્ગાર્ચનોપદેશમ્

## Document Information

Text title : Shivaproktam Vishveshvarajyotirlingarchanopadesham

File name : shivaproktaMvishveshvarajyotirlingArchanopadesham.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 29 shivagaurIsaMvAde kAshIprabhAvakathanam | 225-240||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 17, 2024

*sanskritdocuments.org*

# શિવપ્રોક્તં વિશ્વેશ્વરજ્યોતિર્લિઙ્ગાર્ચનોપદેશમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)
શ્રીશિવઃ (ઉવાચ)
પૂજ્યતે ધ્યાયતે નિત્યં લિઙ્ગં વિશ્વેશ્વરાભિધમ્ ।
વેદોપનિષદાં સારો લિઙ્ગરૂપમુપાશ્રિતઃ ॥ ૨૨૫॥

વિશ્વેશ્વરાભિધં પ્રાપ્ય કાશ્યાં તિષ્ઠતિ સર્વદા ।
વિશ્વેશ્વરાખ્યા જિહ્વાગ્રે ચિત્તે વિશ્વેશ્વરસ્મૃતિઃ ॥ ૨૨૬॥

વિશ્વેશ્વરાર્ચનં હસ્તે યસ્ય તસ્ય ન યાતનાઃ ।
વિશ્વેશ્વરં વિલાસેનાપ્યેકદા વીક્ષ્ય સાદરમ્ ॥ ૨૨૭॥

ન બિભેતિ યમાગ્રેઽપિ કૃતપાપોઽપિ સર્વથા ।
યલ્લિઙ્ગં પાર્વતી ભક્ત્યા બિલ્વૈઃસમ્પૂજ્ય સાદરમ્ ॥ ૨૨૮॥

મુદિતાભૂત્તદેવેદં લિઙ્ગં વિશ્વેશ્વરાભિધમ્ ।
યાગદાનાદિધર્માણાં ફલં યલ્લિઙ્ગદર્શનમ્ ॥ ૨૨૯॥

તદેવેદં પરં જ્યોતિર્લિઙ્ગં વિશ્વેશ્વરાભિધમ્ ।
યદ્વિશ્વેશ્વરલિઙ્ગસ્ય દર્શનં યમતર્જનમ્ ॥ ૨૩૦॥

તદ્વિશ્વેશ્વરલિઙ્ગસ્ય ત્યાગો ન મહતાં મતઃ ।
યદ્વિશ્વેશ્વરલિઙ્ગસ્ય દર્શનં પાપકર્ષણમ્ ॥ ૨૩૧॥

તદ્વિશ્વેશ્વરલિઙ્ગસ્ય ત્યાગો ન મહતાં મતઃ ।
યદ્વિશ્વેશ્વરલિઙ્ગસ્ય ભજનં મોક્ષસાધનમ્ ॥ ૨૩૨॥

તદ્વિશ્વેશ્વરલિઙ્ગસ્ય ત્યાગો ન મહતાં મતઃ ।
સ એવ વાજપેયાદિસર્વયાગફલાશ્રયઃ ॥ ૨૩૩॥

યઃ પ્રેક્ષતે હિ વિશ્વેશં ચક્ષુષા પક્ષ્મપાતિના ।
સ એવ ગજદાનાદિમહાદાનવિચક્ષણઃ ॥ ૨૩૪॥

યો દદ્યાદ્બિલ્વજં પત્રં લિઙ્ગં વિશ્વેશ્વરાભિધે ।
સ એવ સર્વધર્માણાં તપસામપિ સંશ્રયઃ ॥ ૨૩૫॥

યો વ્યોમકેશં વિશ્વેશં સવિશ્વાસમુપાશ્રયેત્ ।
તાવદ્ગર્જત્યઘકુલં કૃતાન્તશ્ચ ભટૈસ્સહ ॥ ૨૩૬॥

યાવન્નાભ્યર્ચ્યતે ભક્ત્યા લિઙ્ગં વિશ્વેશ્વરાભિધમ્ ।
તાવત્તિષ્ઠતિ મર્ત્યેષુ ઘોરસંસારશૃઙ્ખલા ॥ ૨૩૭॥

યાવન્નાભ્યર્ચિતં ભક્ત્યા લિઙ્ગં વિશ્વેશ્વરાભિધમ્ ।
તાવદ્દુઃખાનિ સર્વાણિ ભુજ્યન્તે મનુજૈઃ સદા ॥ ૨૩૮॥

યાવન્નાભ્યર્ચિતં ભક્ત્યા લિઙ્ગં વિશ્વેશ્વરાભિધમ્ ।
તાવન્મરણસન્ત્રાસસ્તાવજ્જન્મભયં મહત્ ॥ ૨૩૯॥

યાવન્નાભ્યર્ચિતં ભક્ત્યા લિઙ્ગં વિશ્વેશ્વરાભિધમ્ ।
તાદ્દુર્ભગતા તાવન્નાનારોગોદ્ભવં ભયમ્ ॥ ૨૪૦॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવપ્રોક્તં વિશ્વેશ્વરજ્યોતિર્લિઙ્ગાર્ચનોપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૯ શિવગૌરીસંવાદે કાશીપ્રભાવકથનમ્ । ૨૨૫-૨૪૦॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 29 shivagaurIsaMvAde kAshIprabhAvakathanam . 225-240..

Notes:
Śiva શિવ describes about the merits of worshiping the Viśveśvara Jyotirliṅga / Viśveśvaraliṅga વિશ્વેશ્વરજ્યોતિર્લિઙ્ગ / વિશ્વેશ્વરલિઙ્ગ at Kāśī કાશી.

Proofread by Ruma Dewan

*Shivaproktam Vishveshvarajyotirlingarchanopadesham*

pdf was typeset on June 17, 2024

Please send corrections to *sanskrit@cheerful.com*